श्रीरस्तु ।

# संस्कृतवैशिष्ट्यम्

वेदवारिधिः प. रामानुजः, बेंगलूरु

## प्रस्तावना

भारतीयविज्ञानसंस्थायाः संस्कृतसङ्घेन आचर्यमाणमहोत्सवविशेषाङ्कस्मरणसञ्चिकान्तर्गतत्वेन मुद्रापयितुं प्रार्थितलेखनत्वेन इदं लेखनं प्रस्तूयते । सङ्घस्योद्देशदृष्ट्या कार्यक्रमस्य दृष्ट्या च संस्कृतभाषायाः वैशिष्ट्यविषये किञ्चिदत्र विज्ञापयामि । संस्कृतभाषायाः आधुनिकसमये प्रासङ्गिकत्वं विचार्य, तस्यां दिशि प्रवृत्तप्रयोगविशेषेषु कांश्चिदुल्लिख्य, भविष्यति काले शक्यसंभावनान् प्रक्रमान् कांश्चित् निर्दिश्य, संस्कृतज्ञैः आधुनिकवैज्ञानिकैश्च संभूय प्रयत्नान् विधाय सार्वजनिकस्तरे लभ्यसौकर्यविशेषविषये निगमनं च अत्र चिकीर्षितम् ।

## उपोद्घातः

प्रायः अद्यत्वे जनेषु द्वयी प्रवृत्तिः संस्कृतभाषाविषये दरीदृश्यते ।

एके तावत् "यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्" इति रीतिं आतिष्ठन्तः, संस्कृतवाङ्मये अविद्यमानं, अविमृष्टं, अनिर्णीतं, असिद्धं, अलब्धं वा

न किमपि विद्यते, तत्र च दोषगन्धलेशोऽपि नास्ति, सुसंस्कृतत्वात्, देववाणीत्वात्, "भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती । यस्यां सर्वाणि शास्त्राणि काव्यानि ललितानि च" इत्यविगानेन संमतत्वात् इत्यादि अभिप्रयन्ति । श्रद्धालवः, साम्प्रदायिकाः, प्राचीनाः, अनद्यतनीनाः, अप्रासङ्गिकाः इत्यादिनामभिः एते व्यवह्रियन्ते, भावनाजीविनः इति च कथ्यन्ते । एतैः प्रायेण अन्तर्मुखैः आधुनिकवैज्ञानिकप्रगतिविषये अश्रद्धा, अज्ञानं, उपेक्षा, मात्सर्यं वा प्रदर्श्यते इति अपोद्यते अन्यैः । गृहीतग्राहित्वमेषां दोषः इति यावत् ।

अपरे तावत्, संस्कृतमयं प्राचीनं सर्वं त्याज्यं (विशिष्य भारतीयं चेत्), अत्र परामर्शयोग्यं न किञ्चिदप्यस्ति, एषा मृतभाषा, केवलं केषाञ्चित् वर्णानां कृते एव वरीवर्ति, जनेषु अवास्तविकभूत उत्कर्षनिकर्षादिकारकं, केवलं आध्यात्मिकादि पारलौकिकविषयप्रतिपादनेन अनुपयुक्तं, न केनापि सुवेद्यं, परस्परव्याहतसिद्धान्तैः संकीर्णं, ताटस्थ्येन न परीक्षितं, अतः आधुनिकपाश्चात्यवैज्ञानिकप्रगतिरेव सर्वोपयोगि, तत्र भारतीयानां केवलं दासवृत्तिरेव युज्यते, यदि पाश्चात्याः केचन संस्कृतस्य श्रैष्ठ्यं अभ्युपयन्ति चेदपि तत् अन्यार्थं, काकतालीयं, उपच्छन्दनं वा भवितुमर्हति, यद्वा भाषास्वन्यतमत्वेन साहित्यार्थं रसिकैः उपयुज्येत, यत्रकुत्रापि शक्यः अल्पातिशयः अत्रापि स्याच्चेत् भवतु नाम, तावता को विशेषः, अद्यत्वे तु नूतनं न किमपि निर्मीयते, शास्त्रकालस्य गतवैभवत्वात् इत्यादि वदन्तः सांप्रदायिकैः लोकायतिकत्वादिशब्दैः विनिन्द्य उपेक्ष्यन्ते ।

अतः मध्यमां वृत्तिमास्थिताः केचित् तु, "पुराणमित्येव न साधु सर्वं न चापि

किञ्चित् नवमित्यवद्यम् । सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः" इति रीत्या वस्तुस्थितिं अन्वेष्टुं प्रयतेरन्, असंकोचेन सत्यम् अभ्युपगच्छेयुश्च । तादृशपरीक्षार्थं उभयपक्षस्यापि ज्ञानं यावदपेक्षितं तावदासादनीयमेव, पूर्वाग्रहं विना विचारश्च विधेयः, अज्ञातविषयेषु टीकाटिप्पण्यादयः स्वमतिविलासेन न कार्याः, प्रमाणप्रमेयादिविशिष्टरीत्या सन्तर्क्य युक्तिप्रमाणान्यतरयुक्तं स्वीकार्यं, वीतरागैः अपक्षपातिभिः विचारः तत्त्वजिज्ञासया केवलं, नतु जिगीषादिना च प्रवर्तनीयः ।

## वेदशास्त्रादीनां विषये विचारः

यद्यपि श्रद्धालूनामेवैते रोचन्ते, आधुनिकानामश्रद्धधानानां, शास्त्रैरेव बहिष्कृतानां च तत्र बोधादिकं न शक्यमिति उपर्युक्तविचार एव न सेत्स्यति, किमु वक्तव्यं तत्र विमर्शे, निर्णयादिविषये इत्युच्येत, तथापि वादिप्रतिवादिनोरुभयोरप्यत्र तुल्ययोगक्षेमत्वात्, ग्रीक्, लातिनादिभाषासु पाश्चात्यमूलतत्वशास्त्रप्रणयनात्, आधुनिकेपि युगे उच्चतमप्रौद्योगिकादिषु परमाण्वस्त्रादिप्रयोगविधीनां भारतीयादिभिः अस्प्रष्टव्यत्ववादादिसाम्यात् 'यत्रोभयोः समो दोषः ..' इति न्यायप्रसरः ।

प्रकृते 'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥' इति निर्दिष्टानां विद्यास्थानानां 'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्याया धर्मस्य च चतुर्दश ॥' इति धर्मस्थानत्वेन च स्मरणात् जगतः धृतिसाधनत्वमेषां

विद्यास्थानानां यथा न हीयेत तथा विचारः विधातुं युक्तः ।
"अधीतिबोधाचरणप्रचारणैः दशाश्चतस्रः प्रणयन्नुपाधिभिः । चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम् (नैषधे)" ॥ इतिवत् न केवलमध्ययनम्, अपितु मनन, आचरण, प्रचारादिकं च कार्यमिति प्राञ्चः ।

एषु, ऋक्, यजुः, साम, अथर्वरूपेण चत्वारः वेदाः, तेषां षडङ्गानि, वेदस्य पुरुषरूपितस्य घ्राण, मुख, पाद, श्रोत्र, चक्षुः, हस्तस्थानीयानि, क्रमशः शिक्षा, व्याकरणं, छन्दः, निरुक्तं, ज्यौतिषं, कल्पः इति प्रसिद्धानि, तथा चत्वारि उपाङ्गानि न्यायविस्तरः, मीमांसा, पुराणं, धर्मशास्त्रमिति प्रसिद्धानि च अन्तर्भवन्ति । वेदाः अपौरुषेयाः नित्याश्च । संहिता, ब्राह्मण, आरण्यक, उपनिषद्भेदेन प्रतिवेदं विभक्ताः अनेकशाखासंभिन्नाः यजुःषु शुक्ल, कृष्णभेदवन्तश्च ।
तेषां प्रतिवेदं प्रतिशाखं च अनेके महर्षयः मन्त्रद्रष्टारः प्रवर्तकाः आसन् । एते वाताशनाः, श्रमणाः ऊर्ध्वरेतसः तपसा ब्रह्मचर्यादिना प्राप्तपरब्रह्मानुभवाः, तस्य स्वयं तान् प्रत्यागमनात् ऋषित्वप्राप्तिरिति च श्रूयते । 'यामृषयो मन्त्रकृतो मनीषिणः । अन्वैच्छन् देवास्तपसा श्रमेण । तां देवीं वाचँ हविषा यजामहे । (तैब्रा २.८.९)', 'वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवुः', 'अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयंभ्वभ्यानर्षत् तदृषीणामृषित्वं..' (तैआ २.७.९) ।

अनादिकालात् अविच्छिन्नगुरुशिष्यश्रवणपरम्परया विशिष्टक्रमेण अद्यापि श्रूयन्ते । सत्सन्तानप्रसूत, सदाचारनिष्ठ, आत्मगुणोपेत, वेदविदाचार्योपनीतस्य

व्रतनियमविशेषयुक्तस्य (अन्तेवासिनः शुश्रूषोः) गुरुमुखोच्चारणानूच्चारणपूर्वकम् अक्षरराशिग्रहणफलम् अध्ययनमित्युच्यते (श्रीभाष्ये) । वेदाध्ययनं च साङ्गं निष्कारणेन कार्यमिति विहितं 'स्वाध्यायः अध्येतव्यः (तैआ २.१५)', ऋषीणां ऋणापाकरणार्थं च 'जायमानो वै ब्राह्मणस्त्रिभिः ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी (तैसं ६.३.१०)', 'नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यः (तैआ ७.१)' इत्यादिषु ।

विनापि अर्थज्ञानं गुरुमुखात्प्राप्तस्य वेदस्य अक्षर, स्वर, मात्रा, प्रयत्नादिषु विना भ्रेषम् उच्चारणस्य अत्यन्तं माहात्म्यं विद्यते यतः अक्षराद्यन्यथाभावेन उच्चारणे वेदप्रतिपाद्यार्थस्य अन्यथाभावः स्वाभाविकः । "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥", ".. तस्मात् साङ्गमधीत्येव ब्रह्मलोके महीयते (पाणिनीयशिक्षा)" इति च स्मरणात् । साङ्गाध्ययनेन अर्थज्ञानं प्राप्योच्चारणे महान् विशेषश्च श्रुतः 'ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः । यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते (तैआ २.११)', 'योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा' इति । स्मृतश्च 'यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्' ॥ इति ।

वेदाङ्गोपाङ्गानां प्रमेयभूता विषयास्तावत् महर्षिभिः अतीतानागतादिसाक्षात्कारवद्भिः तत्वदर्शिभिः, द्विपाच्चतुष्पादविशेषेण

सर्वलोकहिते रतैः सर्वत्र सर्वेषां शान्तिकामैः सूत्रादिमुखेन प्रवर्तिताः । वार्तिक, भाष्यादिभिः व्याख्या, टिप्पणादिभिः ग्रन्थैः अनन्तरवर्तिभिः विवृताश्च । तत्वज्ञान, विचार, विमर्शादि सिद्ध्यर्थं सिद्धान्तोपस्थापनार्थं च पूर्वपक्ष, सिद्धान्तमुखेन, उद्देश, विशेषण, उपलक्षणान्यतररूपेण लक्षण, अव्याप्त्यतिव्याप्त्यसंभवादिरूपेण परीक्षाक्रमेण च बहवः उपायाः शास्त्रेषु ये तावत् सार्वकालिक, सार्वत्रिक जिज्ञासूनाम् अत्यर्थमुपकुर्वते ।

## प्रासङ्गिकता

अतः संस्कृतस्य प्रासङ्गिकताविषये यद्यपि शास्त्राणाम् अध्ययनं देशकालवैगुण्यात् पूर्वतनकालवत् केवलं ज्ञानाद्यर्थं परम्परासंरक्षणार्थं पारमार्थिकरूपेण यथाक्रमं न शक्यते कर्तुं, तथापि तत्रत्यप्रक्रियाविशेषाः, विषयप्रतिपादनशैली, विचारमार्गः, प्रमेयलक्षणाद्यर्थं पद, पदार्थ, प्रकरण, तात्पर्यादि निरूपणप्रकारः इत्यादि सार्वत्रिकं सार्वदिकं चोपकारमातन्वते । पठन, पाठन, संशोधनादिषु, भारतीयभाषाणां कृते च बहूपयुक्ताः इति तु निश्चयेन वक्तुं शक्यते । अन्यश्चात्र विषयः अवधेयः यत् आधुनिकमस्तिष्कयन्त्रादिप्रणालीष्वपि संस्कृतस्य उपयोगः शक्यः अस्ति येन शास्त्राध्ययनाय सौकर्यं कल्प्येत । जनप्रियमाध्यमेन शास्त्राध्ययनरुचिवर्धनं तेन जनानां सुशिक्षिततत्वसंपादनं च प्रयतितुं युक्तम् । प्रसारण, विनिमय, विचाराद्यर्थं विभिन्नदेशकालादिषु स्थितानां युगपत् भागग्रहणं च अत्र उपयुक्तो भवति । बहुमाध्यमद्वारा (लिपि, शब्द, स्थिर/चलचित्रणादि) ज्ञानकार्येषु सौविध्यं विधीयेत । प्रान्तीयभाषासु भाषान्तरणं, तत्तल्लिपिषु लिप्यन्तरणं मूलग्रन्थानां समक्षं दर्शनं, शोधनं इत्यादि शक्यते कल्पयितुम् इति

प्रचारपथात् निरस्तस्यापि पुनरुज्जीवनं साध्यम् । एतत्तु अस्माकं आर्षेयपरम्परायां श्रद्धावर्धनार्थं पूर्वजानां वृत्तान्तादिज्ञानार्थं तत्र साभिमानप्रवृत्त्या सर्वप्रान्तभाषा, कलाचारादिषु गौरव, सम्मानादिसिध्यर्थं च उपकुर्यात् ।

## प्रयोगाः प्रवृत्तयश्च

प्रायः विंशत्युत्तरवर्षेभ्यः संस्कृताध्ययनस्य भाषाविज्ञानादिषु अद्यतनापेक्षापूरणार्थं बहुत्र प्रयोगाः प्रचलन्ति । भारते च पाश्चात्यकार्याणां उदाहरणेन केचन प्रयोगाः संस्कृतज्ञानां आधुनिककंप्यूटर् यन्त्रज्ञानां च संमेलनार्थं विचारविनिमयार्थं च आयोजिताः, येषु १९८६तम ईसवीयवत्सरे ज्ञानप्रतिरूपणविषये बेंगलूरुमध्ये विचारगोष्ठी, १९८९तम ईसवीयवत्सरे नवदेहल्यां संस्कृतं तथा कंप्यूटर् इति विषयमधिकृत्य संगोष्ठी, अनन्तरं भारतीय सर्वकारस्य सूचनाप्रौद्योगिकी मन्त्रालयेन भारतीयभाषाणां कृते बहवः प्रकल्पाः प्रगतसंगणकविकासकेन्द्रद्वारा, भारतीयप्रौद्योगिकीसंस्थाभ्यः, भारतीयविज्ञानसंस्थातः, अन्यविश्वविद्यालयेभ्यः, संस्कृतसंस्थाभ्यश्च प्रवृत्ताः ।

एषु प्रगतसंगणकविकासकेन्द्रेण भारतीयलिपीनां मस्तिष्कयन्त्रे उपयोगार्थं मानकनिर्माणं, तदनुसारेण अक्षराकृत्यादीनां प्रकल्पनं, तेन कंप्यूटर् यन्त्रे प्रदर्शन, मुद्रणाद्यर्थं प्रबन्धः, शब्दकोशादीनां निर्माणं, ग्रन्थानां यन्त्रे आरोपणं, अन्वेषण, सूच्यादिनिर्माण, आकरप्रदर्शन, देशिक नामक व्युत्पत्तिसाधक, सुबन्त, तिङन्तादि निष्पत्ति, सस्वरवैदिकसन्ध्यादि विकृतिपाठादीनां प्रकल्पनं, शाब्दबोधप्रतिरूपणं, सी-व्यासनामक प्रकल्पे वेदानां साङ्गाध्ययनाय

सौकर्यकल्पनं, पाण्डुलिपिसंशोधकनामके कार्यक्रमे, तालपत्रादिभ्यः अमुद्रितग्रन्थानां परिष्कृत्य मुद्रापणं, ग्रन्थालयेषु विद्यमानानां पाण्डुलिप्यादीनां चित्ररूपेण परिवर्त्य यन्त्रे निवेश्य एषु ग्रन्थेषु विद्यमानापूर्वविषयाणां संशोधन, अनुसन्धानादिकं कर्तुं विदुषां साहाय्यं स्वीकर्तुमपि सौविध्यं, व्याख्यादिलेखन, पदादि सूची, उदाहृतग्रन्थादि सूची निर्माणं, उदाहरणानां आकरान्वेषणमित्यादि बहुप्रकारेण भारतीयपरम्परायाज्ञानभण्डारसंरक्षण, संशोधन, वितरणाद्यर्थं कृताः कार्याः निर्देशार्हाः ।

## कर्तव्यशेषः

शिक्षणप्रणाली यदि भारतीयभाषासु निहितस्य निधेः सम्यक् अवगमने विद्यार्थिनां प्रशिक्षणं दत्वा पठ्यक्रमे सूक्तं परिवर्तनं कृत्वा परीक्षणादिष्वपि रटनाद्यपहाय अस्य विशालस्य राष्ट्रस्य विभिन्नकोणेषु अद्यापि विद्यमानस्य भारतस्य प्रतिष्ठारूपाणां अज्ञातानां महानिधिप्रायाणां ज्ञानकोशानां उद्घाटने सामान्यजनपर्यन्तं परिष्कृत्य नयने उपकाराधायककार्यं कर्तुं प्रचोदयेच्चेत् सर्वेषां सर्वतोमुखाभ्युदयाय भवेत् ।

अन्तर्जालादिषु संपर्कमाध्यमद्वारा लिखित, भाषारूपोच्चारणाधारित यन्त्रप्रणालीविकसनेन तदर्थोपयुक्तप्रक्रियादीनां परिकल्पनेन च कार्यममुं सर्वव्याप्यान्दोलनरूपेण सफलयितुं सर्वे मिलित्वा प्रयतेरन् । विद्वांसोऽपि स्वीयक्षेत्रेषु ज्ञानविकासार्थं अनुसन्धानं प्रक्रम्य तदर्थापेक्षितांशान् यन्त्रज्ञैः कारयेयुः येन उभयोः उभयगतगुणानां लाभः स्यात्, उभयगतदोषाणां

अपह्नानं च सिध्येत् ।

विशिष्य इदानीन्तनकाले ’यूनिकोड्’ नाम्ना प्रवर्तमान मानकविषये वैदिकस्वरादिद्योतकचिह्नानां अन्तर्भावने अनुभाव्यमान लोपदोषादीनामपाकरणार्थं सांप्रदायिकाः मिलित्वा तेषां तालपत्रादिभ्यः सङ्ग्रहणे, समाकलने, विभिन्नलिपिगतविशेषांश्च अन्तर्भाव्य निप्यन्तरण, नूतनलिपियोजन, गवेषण, सूच्यादिनिर्माणसौकर्य, लेखन मौखिकरूपयोर्मेलने च शक्तियुक्तप्रणाली विकासे च सादरं सततं च प्रयस्येयुरिति च प्रार्थ्यते ।

एवमेव मुद्रितप्राचीनकोशेभ्यः चित्ररूपप्रतिकृतिं कृत्वा, तेभ्यः कंप्यूटर् यन्त्रगत ’साफ्ट्वेर्’ द्वारा तत्रत्य अक्षरपरिज्ञाने साफल्यं प्राप्तुं च प्रयत्नेन टङ्कनप्रयासः दूरीक्रियेत । परन्तु एतत्कार्यं क्लिष्टं, प्रतिलिपि आवर्तनीयं, मुद्रितादपि हस्तलिखितानां, तत्रापि पाण्डुलिपि, तालपत्रादीनां अवगमने दौष्कर्यातिशयेन च बहुप्रयाससाध्यः । अपितु भगीरथसदृशाः केचन साधयेयुरिममपि कार्यमिति निरीक्ष्यते । अस्मिन्नेव कार्ये तादृशग्रन्थान् पठित्वा, ध्वनिमाध्यमेन संगृह्य, ध्वनेः अक्षरपरिज्ञान, परिवर्तनादिषु प्रयतितुमपि शक्यते । एतदपि क्लिष्टं, परन्तु पूर्वतनात्सुकरः, उपयुक्ततरश्च, यदर्थं ध्वन्याधारितमानककल्पनमपि क्रियेत । अत्र एकस्याः भाषायाः अनेकलिपिषु लेखने परिज्ञानसौकर्यातिशयश्च सिध्येत् । अतः अन्ते ईदृशकार्यादिषु कुशलिनः कुतूहलिनश्च भूयांसः उद्भवेयुः प्रभवेयुश्च स्वप्रयत्नेष्वित्याशास्य विरमामि ॥

शुभमस्तु ॥